तथा चोक्तं गोरक्षनाथेन सिद्धसिद्धान्तपद्धतौ...।

सिद्धाङ्गना

H.P.J.003/050
...सिद्धाङ्गनाः सिद्धाश्च ता अङ्गनाश्चेति वा...।

सिद्धान्त

B.Y.Y.001/006
सिद्धान्तानां च सर्वेषां स्मृतीनां च महामुने ।
B.Y.Y.001/023
वेदान्ताभिहितं यच्च स्मृतिसिद्धान्तयोरपि ।

B.Y.Y.002/013
सिद्धान्तानां तु सर्वेषां वेदवेदान्तयोस्तथा ।
B.Y.Y.002/066
गृहीतः सप्तसिद्धान्तैरन्यैश्च ब्रह्मवादिभिः ।
B.Y.Y.002/068
पाञ्चरात्रैः सदोद्युक्तैः सिद्धान्तैरपि सप्तभिः ।
B.Y.Y.002/082
अपांतरतमो ज्ञेयो वेदसिद्धान्तयोरपि ।
B.Y.Y.002/083
सनत्कुमारसिद्धान्ते ओंकारः समुदाहृतः ।
B.Y.Y.002/097
एवं पाशुपते विद्यात् सिद्धान्ते प्रणवं विभुम् ।
B.Y.Y.002/106
एवं त्रिषष्टिभेदैस्तु सिद्धान्तेषु प्रगीयते ।
B.Y.Y.008/046
स्मृतिदृष्टं भवेदेतत् सिद्धान्ते त्वेतदन्यथा ।
B.Y.Y.012/035
आत्मज्ञाननिमित्तं तु सिद्धान्तानि विचिन्तयेत् ।

सिद्धान्तश्रवण

H.P.J.004/114
नियमविवरणे याज्ञवल्क्येन-'सिद्धान्तश्रवणं...।
V.S.001/053
सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपो व्रतम् ।
V.S.001/060
सिद्धान्तश्रवणं प्रोक्तं वेदान्तभावनं तु वै ।
V.S.001/061
अधीतस्य तथान्यस्य सिद्धान्तश्रवणं भवेत् ।

सिद्धासन

H.P.J.001/034
सिद्धं सिद्धासनम्। पद्मं पद्मासनम्।
H.P.J.001/034
...सुखे सुखकरे सिद्धासने सदा तिष्ठेत्।
H.P.J.001/034
एतेन सिद्धासनं चतुष्टयेऽप्युत्कृष्टमिति सूचितम्।
H.P.J.001/035
आसनचतुष्टयेऽप्युत्कृष्टत्वात् प्रथमं सिद्धासन...।
H.P.J.001/035
...सिद्धासननामकमिदं भवेदित्यर्थः।
H.P.J.001/036
मत्स्येन्द्रसम्मतं सिद्धासनमुक्त्वान्यसम्मतं...।
H.P.J.001/036
इदं सिद्धासनं मतान्तराभिमतं भवेदित्यर्थः।
H.P.J.001/037
एतत् पूर्वोक्तं सिद्धासनं सिद्धासननामकं प्राहुः।
H.P.J.001/037
...दक्षिणपादपार्ष्णिर्मेण्ढ्रादुपरि स्थाप्यते तत् सिद्धासनम्।
H.P.J.001/038
...सिद्धासनं प्रशंसन्ति-यमेष्वित्यादिभिः।
H.P.J.001/038
...एकं सिद्धासनं मुख्यं विदुरिति सम्बन्धः।
H.P.J.001/039
...सिद्धमेव सिद्धासनमेव सदा सर्वदाभ्यसेत्।
H.P.J.001/039
सिद्धासनस्य सदाभ्यासे हेतुगर्भं विशेषणं...।
H.P.J.001/040
...सिद्धासनस्याभ्यासाद् योगी योगाभ्यासी...।
H.P.J.001/040
योगान्तराभ्यासमन्तरेण सिद्धासन...सिद्धि...।
H.P.J.001/041
सिद्धासने सिद्धे सत्यन्यैर्बहुभिः पीठैरासनैः किम्?
H.P.J.001/042
तथोक्तप्रकारेणैकस्मिन्नेव सिद्धासने दृढे बद्धे...।
H.P.J.001/043
सिद्धेन सिद्धासनेन सदृशमासनं नास्तीति शेषः।
H.P.J.002/001
दृढे स्थिरे कुक्कुटादिविवर्जिते सिद्धासन...।
H.P.J.002/048
...सिद्धासनमेव...बन्धनेन सम्पाद्यैव कृत्वैवेत्यर्थः।
H.P.J.004/067
मुक्तासने सिद्धासने स्थितो योगी शाम्भवीं मुद्राम्...।

सिद्धि

B.Y.Y.001/038
येन यदृषिणा दृष्टं सिद्धिः प्राप्ता च येन वै ।
B.Y.Y.001/042
पुराकल्पे समुद्दिष्टा मन्त्राः कर्मार्थसिद्धये ।
B.Y.Y.007/056
अध्यात्मविद्या विविधा जप्तव्या जपसिद्धये ।

B.Y.Y.009/047
जगदाधानसिद्ध्यर्थं सूर्यात्मा जगतोऽपि च ।
B.Y.Y.009/196
अर्थानां छन्दतः सृष्टिर्योगसिद्धेस्तु लक्षणम् ।
B.Y.Y.011/046
स्वकर्मणा तमेवार्च्य सिद्धिं प्राप्नोति मानवः ।
B.Y.Y.011/047
कर्मसन्यासयोगेन ब्राह्मणः सिद्धिमाप्नुयात् ।
H.P.J.001/002
हठविद्याया राजयोग एव मुख्यं फलं न सिद्धय...।
H.P.J.001/002
सिद्धयस्त्वानुषङ्गिक्यः।
H.P.J.001/003
राजयोगसिद्धौ किं हठविद्योपदेशेनेत्याशङ्क्य...।
H.P.J.001/003
सत्त्वापत्तेरनन्तरा...भूमावुपस्थितासु सिद्धिषु...।
H.P.J.001/003
...हठयोगादेव राजयोगसिद्धिं वदन् ग्रन्थं...।
H.P.J.001/003
सिद्धिषु असंसक्तस्यासंसक्ति...।
H.P.J.001/011
सिद्धिमणिमाद्यैश्वर्यमिच्छता...कैवल्यसिद्धि...।
H.P.J.001/011
सिद्धिमणिमाद्यैश्वर्यमिच्छता...कैवल्यसिद्धि...।
H.P.J.001/012
अत्र 'युक्ताहारविहारेण हठयोगस्य सिद्धये' इत्यर्धं...।
H.P.J.001/014
शिवप्रसादाल्लभते योगसिद्धिं च शाश्वतीम्।
H.P.J.001/040
...निष्पत्तिं योगसिद्धिमाप्नुयात् प्राप्नुयात्।
H.P.J.001/040
योगान्तराभ्यासमन्तरेण सिद्धासन...सिद्धिं...।
H.P.J.001/064
योगाङ्गाभ्यासात् सिद्धिमाप्नोतीत्यर्थः।
H.P.J.001/064
अभ्यासादासनकुम्भकादीनाम...सिद्धिं समाधि...।
H.P.J.001/065
अभ्यासादेव सिद्धिर्भवतीति द्रढयन्नाह द्वाभ्याम्...।
H.P.J.001/065
क्रिया योगाङ्गानुष्ठानरूपा...सिद्धिर्योगसिद्धिः...।
H.P.J.001/065
...पाठेन योगस्य सिद्धिर्न प्रजायते नैव...।
H.P.J.001/066
...वेषस्य काषायवस्त्रादेः धारणं सिद्धेर्योगसिद्धेः...।
H.P.J.001/066
किं तर्हि सिद्धेः कारणमित्यत आह-क्रियैवेति ।
H.P.J.002/004
कार्यस्य कैवल्यरूपस्य सिद्धिर्निष्पत्तिः...।
H.P.J.002/012
...योगसाधनेषु प्राणायामो...तत्सिद्धौ प्रत्याहार...।
H.P.J.002/014
केवले कुम्भके सिद्धेऽभ्यासो दृढो भवति।
H.P.J.002/018
एवमभ्यस्येच्चेत् सिद्धिं हठसिद्धिमवाप्नुयात्।
H.P.J.002/043
विचित्रेषु कुम्भकेषु प्रवृत्तिं जनयितुं...तत्सिद्धय...।
H.P.J.002/043
...उन्मन्यवस्थासिद्धये चित्रान् सूर्यभेदनादिभेदेन...।
H.P.J.002/043
...सिद्धिम्। तदुक्तं भागवते।
H.P.J.002/043
जन्मौषधितपोमन्त्रैर्यावत्य इह सिद्धयः।
H.P.J.002/048
अनन्तं प्रणमेद् देवं नागेशं पीठसिद्धये।
H.P.J.002/072
केवलस्य केवलकुम्भकस्य सिद्धिः केवलसिद्धिर्यावत्...।
H.P.J.002/075
हठस्य हठाभ्यासस्य सिद्धिः...।
H.P.J.002/075
...प्रत्याहारादिपरम्परया कैवल्यरूपा सिद्धिर्जायते।
H.P.J.002/076
...या निष्पत्तिस्तस्या राजयोगसिद्धिपर्यन्तं...।
H.P.J.002/078
...एतद्धठस्य हठाभ्याससिद्धेर्भाविन्या लक्ष्यतेऽनेनेति...।
H.P.J.003/018
...सिद्धयश्चाणिमाद्यास्तासां करी कर्त्रीयम्।
H.P.J.003/023
अयमुक्तः खलु प्रसिद्धः महाबन्धः, महासिद्धीः...।
H.P.J.003/033
खेचरीसिद्धेर्लक्षणमाह-छेदनेति।

H.P.J.003/033
...तदा खेचर्याः सिद्धिः खेचरीसिद्धिर्भवति।
H.P.J.003/052
अन्यथा सुकरणबन्धनाभावे कायस्य देहस्य सिद्धी...।
H.P.J.003/064
...योगस्य संसिद्धिः सम्यक् सिद्धिस्तां योगसिद्धिं...।
H.P.J.003/083
...सिद्धीनामणिमादिनां भाजनं पात्रं भवति।
H.P.J.003/085
...बिन्दोरुपर्याकर्षणमभ्यसेद् वज्रोलीमुद्रासिद्धिमाप्नुयात्...।
H.P.J.003/086
...बिन्द्राकर्षणे सिद्धे वज्रोलीमुद्रासिद्धिः।
H.P.J.003/086
...खेचरीमुद्राप्राणजयोभयसिद्धौ तु सम्यग् भवति।
H.P.J.003/095
तादृशानां पुंसां सिध्येत् सिद्धिं गच्छेत्।
H.P.J.003/103
वज्रोल्या अभ्यासस्य योगो युक्तिस्तस्माद् देहस्य सिद्धिं...।
H.P.J.003/120
...सिद्धीनामणिमादीनां भाजनं पात्रं भवति।
H.P.J.003/121
...मण्डलाच्चत्वारिंशद्दिनात्मकादनन्तरं सिद्धिः...।
H.P.J.003/125
...भद्रां शुभां सिद्धिं योगसिद्धिं प्रयच्छति ददाति।
H.P.J.003/130
...पुरुषोऽणिमादिगुणैरणिमादिसिद्धिभिः...कालस्य...।
H.P.J.004/008
...सिद्धिरणिमादिर्गुरुवाक्येन गुरुवचसा लभ्यते।
H.P.J.004/014
...समाधिनिरूपणानन्तरं समाधिसिद्धौ तत्सिद्धि...।
H.P.J.004/014
पूर्वोक्तममरोल्यादिकं समाधिसिद्धावेव सिद्ध्यतीति...।
H.P.J.004/015
संप्राप्ताः परमां सिद्धिं पूर्वाभ्यस्तस्वयोगतः।
H.P.J.004/025
... मोक्षाख्यपदस्य सिद्धिर्निष्पत्तिर्भवति।
H.P.J.004/053
...एतादृशौ योगी सिद्ध्यत्येव, अमृताप्लावनेन सिद्धो...।
H.P.J.004/074
...सिद्धीनामणिमादीनां समाश्रयं स्थानम्।
H.P.J.004/074
तदा तस्यामवस्थायां सर्वसिद्धिसमाश्रयं सर्वासां...।
H.P.J.004/103
राजयोगस्य मनसः सर्ववृत्तिनिरोध...सिद्धये निष्पत्तये...।
H.P.J.004/113
सिद्ध्यादिवासनात्यागी जीवन्मुक्तो भवेन्मुनिः।
V.S.001/066
धर्मार्थकामसिद्ध्यर्थमुपायग्रहणं व्रतम् ।
V.S.003/029
यावत् केवलसिद्धिः स्यात् तावत् सहितमभ्यसेत् ।
V.S.003/030
केवले कुम्भके सिद्धे रेचपूरणवर्जिते ।
Y.S.024
यं कञ्चनाभिसिद्धये स्यान्मन्त्रयोगः स कथ्यते।
Y.S.026
प्रायेण लभते ज्ञानं सिद्धिश्चैवाणिमादिकाः।
Y.S.048
शिथिलो निर्जने देशे कुर्याच्चेत्सिद्धिमाप्नुयात्।
Y.S.079
अभ्यासात्सिद्धिमाप्नोति योगे सर्वोप्यतन्द्रितः।
Y.S.082
योगाभ्यासरतो नित्यं सर्वसिद्धिमवाप्नुयात्।
Y.S.083
क्रियायुक्तस्य सिद्धिः स्यादक्रियास्य कथं भवेत्।
Y.S.084
न शास्त्रपाठमात्रेण काचित्सिद्धिः प्रजायते।
Y.S.089
क्रियाहीनोऽथवा क्रूरः कथं सिद्धिमवाप्नुयात्।
Y.S.090
न वेषधारणं सिद्धेः कारणं न च तत्तथा।
Y.S.091
कृपैव कारणं सिद्धेः सत्यमेव तु साङ्कृते।
Y.S.099
वर्जयेत्तान्प्रयत्नेन, ईदृशी सिद्धिदा क्रिया।
Y.S.141
उपायं च प्रवक्ष्यामि क्षिप्रं योगस्य सिद्धये।
Y.S.162
येन भूचरसिद्धिः स्याद् भूचराणां जये क्षमः।
Y.S.176
एवमभ्यासयोगेन सिद्धिरारम्भसम्भवा।

Y.S.199
तदा बुद्धिमता भाव्यं योगिना योगसिद्धये।
Y.S.289
गत्वा योगस्य संसिद्धिं यच्छतो नात्र संशयः।
Y.S.303
वज्रोलिं यो विजानति स योगी सिद्धिभाजनः ।
Y.S.305
लभ्यते यदि तस्यैव योगसिद्धिकरं स्मृतम् ।
Y.S.310
स्वप्रयोजनमात्रैकसाधनात् सिद्धिमाप्नुयात् ।
Y.S.319
न दिङ्मात्रेण सिद्धिस्स्यादभ्यासेनैव जायते ।
Y.S.326
सर्वासिद्धीरवाप्यासौ दत्तात्रेयप्रसादतः ।
Y.S.333
यः संस्मृत्या मुनीनामपि दुरितहरो योगसिद्धिप्रदश्च ।
Y.T.028
सिद्धिं तथाविधमनोविलयां समाधौ।

सिद्धिकरी

B.Y.Y.004/032
सर्वावयवसंपूर्णा ध्याता सिद्धिकरी भवेत् ।

सिद्धिजनक

H.P.J.003/076
...सिद्धिजनकं योगिनो गोरक्षाद्या विदुर्जानन्ति।

सिद्धिदा

B.Y.Y.010/018
नोदकस्य तु विक्षेपात् संध्या भवति सिद्धिदा ।

सिद्धिभाजन

H.P.J.003/083
...स्वेच्छया निजेच्छया वर्तमानोऽपि सिद्धिभाजनं...।

सिद्ध्यभिलाषिन्

H.P.J.001/013
अनवसादो भवति योगी सिद्ध्यभिलाषुकः।

सिन्धुदेश

H.P.J.003/035
...सिन्धुदेशोद्भवं लवणं पथ्या हरीतकी ताभ्यां प्रघर्षयेत्...।

सिन्धुद्वीप

B.Y.Y.007/178
सिंधुद्वीपो भवेदार्षं गायत्री च्छन्द एव हि ।

सीत

H.P.J.002/054
वक्त्रे मुखे सीत्कां...शब्दः सीत्कारस्तां कुर्यात्।

सीत्कार

H.P.J.002/054
वक्त्रे मुखे सीत्कां...शब्दः सीत्कारस्तां कुर्यात्।
H.P.J.002/054
अथ सीत्कार्याः प्रशंसा।

सीत्कारी

H.P.J.002/048
उज्जायिनं ततः कुर्यात् सीत्कारीं शीतलीं ततः।
H.P.J.002/054
ओष्ठयोरन्तरे...जिह्वया सीत्कारपूर्वकं मुखेन पूरकं...।
H.P.J.002/054
सीत्कारीकुम्भकमाह-सीत्कामिति।
H.P.J.002/054
कुम्भकस्त्वनुक्तोऽपि सीत्कार्याः कुम्भकत्वा...।
H.P.J.002/066
सीत्कारीशीतल्यौ शीतले प्रायेणोष्णे हिते।
H.P.J.002/066
सीत्कारीशीतल्यौ प्रायेण पित्तहरे।

सीवनी

H.P.J.001/050
वृषणस्याधः...सीवन्याः पार्श्वयोः...उभयभागयोः...।
H.P.J.001/050
सीवन्या दक्षिणे भागे सव्यगुल्फं स्थापयेत्।
H.P.J.001/050
सव्यके सीवन्याः सव्यभागे दक्षिणगुल्फं स्थापयेत्।
H.P.J.001/053
वृषणस्याधः सीवन्याः पार्श्वयोः सीवन्या उभयतः।
H.P.J.001/053
सव्ये सीवन्याः पार्श्वे सव्यगुल्फं क्षिपेत्।
H.P.J.001/053
दक्षगुल्फं तु दक्षिणे सीवन्याः पार्श्वे क्षिपेत्।

H.P.J.003/073
अङ्गुष्ठगुल्फजानूरुसीवनीलिङ्गनाभयः।
V.S.001/069
सीवन्यामात्मनः पार्श्वे गुल्फौ निक्षिप्य पादयोः ।
V.S.001/073
गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपेत् ।
V.S.001/079
गुल्फौ च वृषणस्याधः सीवन्याः पार्श्वयोः क्षिपन् ।
V.S.001/082
सम्पीड्य सीवनी सूक्ष्मां गुल्फेनैव तु सव्यतः ।
V.S.003/042
दक्षिणेतरगुल्फेन सीवनीं पीडयेच्छिराम् ।

सीसक

H.P.J.003/086
शस्तः प्रशस्तो यो नालस्तेन शस्तनालेन सीसकादि...।
H.P.J.003/086
अथ वज्रोलीसाधनप्रक्रिया-सीसकनिर्मितां स्निग्धां...।

सुकर

H.P.J.001/019
तत्र सुकरत्वात् प्रथमं स्वस्तिकासन...जानूर्वोरिति।
H.P.J.004/099
...सुकरं सुखेन कर्तुं शक्यं स्यात्।

सुकरण

H.P.J.003/052
...सुकरणं शोभनं करणं खेचरी मुद्राख्यं बध्नीयात्।
H.P.J.003/052
सुकरणे बद्धे चन्द्रसारस्रवणाभावाद् मृत्युर्न...।

सुकृत्

B.Y.Y.011/051
प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम् ।

सुकृतिन्

B.Y.Y.008/040
निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ।
H.P.J.003/095
...योगः पुण्यं विद्यते येषां ते पुण्यवन्तः सुकृतिनस्तेषां...।

सुप्ता

H.P.J.003/002
सुप्ता कुण्डली गुरोः प्रसादेन यदा जागर्ति बुध्यते तदा...।
H.P.J.003/068
तेन ज्वलनस्यात्यन्तप्रदीपनेन सन्तप्ता...सुप्ता...।
H.P.J.003/111
सुप्तां निद्रितां भुजगीं तां कुण्डलिनीं पुच्छे...।
H.P.J.003/119
...सुप्ता सुखसुप्ता तां सुखसुप्तामरुन्धतीं शक्तिं नित्यं...।

सुरभि

H.P.J.001/013
धूपामोदादिसुरभि कुसुमोत्करमण्डितम्।

सुषुम्णा

B.Y.Y.009/096
इडासुषुम्णे द्वे नाड्यौ रश्मिसंज्ञे व्यवस्थिते ।
V.S.002/018
वायुर्वायुसखेनैव ततो याति सुषुम्णया ।
V.S.002/019
कन्दमध्ये स्थिता नाडी सुषुम्णेति प्रकीर्तिता ।
V.S.002/021
सुषुम्णेडा ततः पश्चात् पिङ्गला च सरस्वती ।
V.S.002/024
मुक्तिमार्गे सुषुम्णा सा ज्वलन्ती विश्वधारिणी ।
V.S.002/025
कन्दस्य मध्यमे पुत्र सुषुम्णा सुप्रतिष्ठिता ।
V.S.002/026
मोक्षपन्थाः सुषुम्णा सा ब्रह्मरन्ध्रे प्रकीर्तिता ।
V.S.002/030
भोक्त्री सुषुम्णा कालस्य गुह्यमेतदुदाहृतम् ।
V.S.002/031
सरस्वती कुहूश्चैव सुषुम्णापार्श्वयोः स्थिता ।
V.S.002/034
पूर्वभागे सुषुम्णायास्त्वामेढ्रान्तं कुहूः स्थिता ।
V.S.003/039
ब्रह्मरन्ध्रे सुषुम्णाया मृणालान्तरसूत्रवत् ।
V.S.003/051
ब्रह्मरन्ध्रे सुषुम्णायां ध्यायन्नोङ्कारमक्षयम् ।

सुषुम्नानाडी

H.P.J.004/067

एकधीरेकाग्रचित्तः...दक्षिणे कर्णेऽन्तस्थं सुषुम्नानाड्यां...।

सुख

B.Y.Y.009/187

तत्रोपविश्य ससुखं गुरुमादौ प्रणम्य च ।

H.P.J.001/004

भावनायाश्च...तां विना सुखस्याप्यसम्भवात्।

H.P.J.001/004

न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्।

H.P.J.001/034

...सुखे सुखकरे सिद्धासने सदा तिष्ठेत्।

H.P.J.002/028

...सुखप्रकाशलाघवादिसात्त्विकधर्माविर्भावः...।

H.P.J.002/041

...सुखादनायासाद् विशति सुषुम्नान्तरिति शेषः।

H.P.J.002/048

सुखं ददातीति सुखदं तस्मिन् सुखदे।

H.P.J.002/066

...पवित्रकारकं सुखं...सुखदं हितं त्रिदोषहरत्वात्...।

H.P.J.002/069

सुखप्रदा सुखं प्रददातीति सुखप्रदा।

H.P.J.002/070

पद्मपत्रेण तुल्यं सुखादनायासात् प्लवते तरति...।

H.P.J.002/072

रेचकं पूरकं मुक्त्वा त्यक्त्वा सुखमनायासं...।

H.P.J.003/003

सुखेन गमनसम्भवात्।

H.P.J.003/093

...सुखेनैवानन्देनैवासीनयोरुपविष्टयोः क्षणाद्रत्युत्सव...।

H.P.J.003/128

आदिनाथेन सर्वेश्वरेण शम्भुना शं सुखं...शम्भुस्तेन।

H.P.J.004/002

...वासनाक्षयैः सुखस्य जीवन्मुक्तिसुखस्योपायं...।

H.P.J.004/015

स्वसंवेद्यं हि तद् ब्रह्म कुमारी स्त्रीसुखं यथा।

H.P.J.004/015

आत्मारामः सदा पूर्णः सुखमात्यन्तिकं गतः।

H.P.J.004/015

...सुखादिप्रत्यक्षे व्यभिचारात्।

H.P.J.004/030

अनिर्वाच्यानन्दाविर्भावे जीवन्मुक्तिसुखं भवत्येवेति भावः।

H.P.J.004/058

ततः सुखमपि प्राप्स्यसीति भावः।

H.P.J.004/058

'न चाभावयतः शान्तिरशान्तस्य कुतः सुखम्'।

H.P.J.004/099

...सुकरं सुखेन कर्तुं शक्यं स्यात्।

H.P.J.004/111

...सुखं सुखसाधनं सुरभिचन्दनाद्यनुलेपनादिकं न।

H.P.J.004/114

भक्तास्तु सुखस्यैव पुरुषार्थत्वाद् दुःखासंभिन्न...।

V.S.001/055

या धीस्तामृषयः प्राहुः सन्तोषं सुखलक्षणम् ।

V.S.003/027

रेचनं पूरणं मुक्त्वा सुखं यद्वायुधारणम् ।

V.S.005/007

भोग्यमाभ्यन्तरं बाह्यं सुखादि च घटादि च ।

Y.S.238

यत्र तत्र स्थितो वापि सुखमत्यन्तमश्नुते।

Y.S.333

कारुण्याद्यः...सुखदुःखसुहृद् योगशास्त्रस्य नाथः ।

सुखकर

H.P.J.001/034

...सुखे सुखकरे सिद्धासने सदा तिष्ठेत्।

सुखकरी

H.P.J.002/034

सदैव सर्वदैवानन्दकरी सुखकरी।

सुखरूप

H.P.J.004/001

शिवाय सुखरूपायेश्वराभिन्नाय वा।

H.P.J.004/018

यद्वा शं सुखरूपो भवति...शम्भुरात्मा तस्येयं शाम्भवी।

सुखसाधन

V.S.005/049

पार्थिवे वारुणांशे च गमनं सुखसाधनम् ।

सुखस्वरूप
Y.S.001
नृसिंहरूपिणे चिदात्मने सुखस्वरूपिणे।

सुखासन
H.P.J.002/048
...देशे च सुखासनस्थः शुचिः समग्रीवशिरःशरीरः'...।

सुखासीन
B.Y.Y.001/003
सुखासीनं मुनिवरं ध्यानयोगपरायणम् ।
V.S.001/014
पद्मासने सुखासीनं चतुराननमव्ययम् ।

सुखित्व
H.P.J.004/058
...कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वसजातीयविजातीय...।

सुखिन्
H.P.J.004/015
असौ किं वृश्चिकैर्दष्टो देहान्ते वा कथं सुखी।
H.P.J.004/083
...चित्तचाञ्चल्यं जित्वाऽभिभूय सुखी स्वानन्दी भवेत् ।

सुखोपाय
H.P.J.004/080
...प्राप्तुं लब्धुं पूर्वोक्तभ्रूध्यानरूपः सुखोपायः सुखसाध्य...।
H.P.J.004/080
...उपायः सुखोपायः अल्पचेतसामल्पबुद्धीनामपि।

सुगन्ध
H.P.J.003/089
...बिन्दुधारणं तस्मात् सुगन्धः शोभनो गन्धो जायते...।
Y.S.111
वासितं च सुगन्धेन धूपितं गुग्गुलादिभिः।

सुगन्धि
Y.S.171
योगिनोऽङ्गे सुगन्धिः स्यात् सततं बिन्दुधारणात्।

सुत
B.Y.Y.007/079
येभ्य एव पिता दद्यात् तेभ्यो दद्यात् स्वयं सुतः ।
B.Y.Y.011/041
सुतादिष्वनभिष्वङ्गो निवृत्तं कर्म वैदिकम् ।

सुतीक्ष्ण
H.P.J.003/034
...स्नुहीपत्रनिभं, सुतीक्ष्णमतितीक्ष्णं, स्निग्धं च...।

सुधा
H.P.J.003/098
...चन्द्रस्येयं चान्द्री तां चान्द्रीं सुधां विभूत्या भस्मना...।
H.P.J.004/009
विषया ऐहिका दारादय आमुष्मिकाः सुधादयस्तेषां...।
H.P.J.004/064
...चन्द्राद् भ्रूमध्यस्थाज्जन्म यस्यास्तस्यै सुधायै पीयूषाय...।

सुधामय
H.P.J.003/077
दिव्यमुत्कृष्टं सुधामयं रूपं यस्य स तथा तस्माद्...।

सुधारस
V.S.004/042
सुधारसं विमुञ्चद्भिः शशिरश्मिभिरावृतम् ।
V.S.006/033
सुधारसं विमुञ्चद्भिः शशिरश्मिरावृते ।
V.S.006/038
सुधारसं विमुञ्चद्भिः शशिरश्मिभिरावृते ।

सुधिन्
H.P.J.002/057
सुधीः शोभना धीर्यस्य सः।
H.P.J.002/060
...सुस्थिता धीर्यस्य स सुधीः...।
H.P.J.003/052
...तच्च तत्सुषिरं विवरं तस्मिन् विवरे सूधीः शोभनां...।

सुनिश्चल
V.S.002/061
समग्रीवशिरःकायः संवृतास्यः सुनिश्चलः ।

सुपर्ण
B.Y.Y.007/063
पिशाचांश्च सुपर्णांश्च भूतान्यथ पशूंस्तथा ।

सुप्त
H.P.J.002/066
क्षिप्रं शीघ्रं कुण्डल्याः सुप्ताया बोधकं बोधकर्तृ...पवनं...।
H.P.J.003/002
कुण्डलीबोधस्य फलमाह द्वाभ्याम्-सुप्तेति।
H.P.J.003/005
...पिधाय सुप्तामीश्वरीं कुण्डलीं प्रबोधयितुं प्रकर्षेण...।
H.P.J.004/110
...विषयाकारपरिणामाभावात् तत्सुप्तम्...।
H.P.J.004/110
यस्य योगिनश्चित्तमन्तःकरणं न सुप्तम्।

सुप्तवत्
H.P.J.004/112
सुप्तवत् सुप्तेन तुल्यं कायेन्द्रियव्यापारशून्यो यो योगी...।

सुभिक्ष
H.P.J.001/012
सुभिक्ष इत्यनेनानायासेन तल्लाभः सूचितः।

सुर
B.Y.Y.007/069
प्रागग्रेषु सुरान् सर्वान् दक्षिणाग्रेषु वै पितृन् ।
B.Y.Y.007/093
सुराणामर्चनं कुर्याद्ब्रह्मादीनाममत्सरः ।
B.Y.Y.009/076
स्तेनास्तेन हि जीवन्ति सौम्येन सुरमानवाः ।
V.S.004/055
ध्यानेनानेन सौरेण मुक्तिं यान्तीह सूरयः ।
V.S.006/010
तदेतद् ब्रह्मभुवनं प्रणवे यत्र सूरयः ।

सुरत
H.P.J.003/009
...कुलस्त्रियाः सुरतं कुलस्त्रीसुरतं संगमनं यथा यद्वत्।

सुरभि
B.Y.Y.007/003
मृद्गोमयतिलान् दर्भान् पुष्पाणि सुरभीणि च ।
H.P.J.004/109
समाधिना युक्तो योगी न गन्धं सुरभिमसुरभि वा न रसं...।

H.P.J.004/111
...सुखं सुखसाधनं सुरभिचन्दनाद्यनुलेपनादिकं न।

सुरम्य
H.P.J.001/013
कुर्याद् योगगृहं धीमान् सुरम्यं शुभवर्त्मना।

सुरराज
H.P.J.004/082
सुरराजतनूजवैरिरन्ध्रे विनिरुध्य स्वकराङ्गुलिद्वयेन।
H.P.J.004/082
सुरराज इन्द्रस्तस्य तनूजोऽर्जुनस्तस्य वैरी कर्णस्तद्रन्ध्रे।

सुरा
B.Y.Y.004/062
ब्रह्महा हेमहारी च यस्तु विप्रः सुरां पिबेत् ।
H.P.J.001/059
... मद्यं सुरा, मत्स्यो झष.।

सुराज्य
H.P.J.001/012
अथ हठाभ्यासयोग्यं देशमाह सार्धेन-सुराज्य इति।
H.P.J.001/012
...राज्यं तच्छोभनं यस्मिन् स सुराज्यः...।
H.P.J.004/016
...सुस्थाने शोभने स्थाने 'सुराज्ये धार्मिक देशे'...।

सुरापान
B.Y.Y.004/055
ब्रह्महत्यां सुरापानं सुवर्णस्तेयमेव वा ।

सुरापि
B.Y.Y.008/038
ब्रह्महा च सुरापश्च अगम्यागमने रतः ।

सुरुचि
H.P.J.002/019
कायस्य देहस्य कृशता कार्श्यं कान्तिः सुरुचि...।

सुरेश्वराचार्य
H.P.J.001/011
सुरेश्वराचार्याः- इहामुत्र विरक्तस्य संसारं...।

सुलभ
H.P.J.004/009
गुरुकृपया तु सर्वं सुलभमिति भावः।

सुलभा
H.P.J.004/015
मैत्रेयी सुलभा शार्ङ्गी शाण्डिली च तपस्विनी।

सुवर्ण
B.Y.Y.004/055
ब्रह्महत्यां सुरापानं सुवर्णस्तेयमेव वा ।
B.Y.Y.007/077
तिलानामप्यभावे तु सुवर्णरजतान्वितम् ।
B.Y.Y.007/114
सौवर्णं राजतं ताम्रं मुख्यं पात्रं प्रकीर्तितम् ।
B.Y.Y.008/038
सुवर्णस्तेयि चौरश्च गोघ्नो विस्रम्भघातकः ।

सुवर्णकार
H.P.J.003/086
ततः सुवर्णकारस्य अग्निधमनसाधनीभूतनालसदृशं...।

सुशिक्षित
H.P.J.001/011
स्वाश्रमस्थः सदाचारो विद्वद्भिश्च सुशिक्षितः।

सुशोभन
V.S.002/058
सुशोभनं मठं कृत्वा सर्वरक्षासमन्वितम् ।
Y.S.107
सुशोभनं मठं कुर्यात्सूक्ष्मद्वारं तु निर्घुणम्।

सुषिर
H.P.J.003/032
कपाले मूर्घ्नि कुहरं सुषिरं तस्मिन् कपालकुहरे विपरीतं...।
H.P.J.003/052
...तच्च तत्सुषिरं विवरं तस्मिन् विवरे सुधीः शोभनां...।
H.P.J.003/053
सुषिरमिति। पञ्च यानि स्रोतांसीडादीनां प्रवाहास्तैः...।
H.P.J.003/053
...अलौकिकाबाधितात्मसाक्षात्कारजनकं यत्सुषिरं...।
H.P.J.003/053
...विवरं तस्मिन् सुषिरेऽञ्जनमविद्या...शोकमोहादि...।
H.P.J.003/053
...सुषिरावकाशे खेचरी मुद्रा तिष्ठते स्थिरीभवति।
H.P.J.004/053
अमृतैः सुषिरनिर्गतैः पादतलं च मस्तकं च पादतलमस्तकम्।

सुषुप्त
B.Y.Y.002/088
जाग्रत् स्वप्नं सुषुप्तं च पदान्येतानि तस्य तु ।
B.Y.Y.002/124
जाग्रत् स्वप्नसुषुप्तं च तुर्यं चैव चतुर्थकम् ।

सुषुप्ति
H.P.J.002/055
निद्रा सुषुप्तिर्न।
H.P.J.004/030
चित्तलयस्य सुषुप्तावपि सत्त्वान्मनःप्राणयोर्लये...।
H.P.J.004/048
...जाग्रत्स्वप्नसुषुप्तिभ्यश्चतुर्थावस्थाख्यं ज्ञातव्यम्।
H.P.J.004/107
जाग्रत्स्वप्नसुषुप्तिमूर्च्छामरणलक्षणाः पञ्च...।
H.P.J.004/112
जाग्रदवस्थायामित्यनेन स्वप्नसुषुप्त्योर्निवृत्तिः।
V.S.005/009
तथाऽवस्थाश्चतस्रस्तु जाग्रत् स्वप्नसुषुप्तयः ।
V.S.005/011
सुषुप्तिः स्वात्मरूपेण निर्व्यापारेण संस्थितिः ।

सुषुप्तिभाव
Y.T.015
न जागरो नापि सुषुप्तिभावः।

सुषुम्ना
B.Y.Y.006/024
बद्धमेतं सुषुम्णायां दीर्घघण्टानिनादवत् ।
H.P.J.002/041
...विशोधिते निर्मले सति मारुतो वायुः सुषुम्ना...।
H.P.J.002/041
...सुखादनायासाद् विशति सुषुम्नान्तरिति शेषः।
H.P.J.002/042
मध्ये सुषुम्नामध्ये सञ्चारः सम्यक् चरणं...।

H.P.J.002/046
...कृतेन बन्धत्रयेण प्राणो वायुर्ब्रह्मनाडिं सुषुम्नां...।
H.P.J.002/046
...ब्रह्मनाडिगः सुषुम्नानाडिगामी...।
H.P.J.002/066
ब्रह्मनाडी सुषुम्ना ब्रह्मप्रापकत्वात्।
H.P.J.002/067
सम्यग् दृढीभूतं गात्रे गात्रमध्ये सुषुम्नायामेव सम्यगुद्भूतं...।
H.P.J.002/072
...सुषुम्नान्तः षट्शब्दा भवन्ति तदा केवलकुम्भकः...।
H.P.J.002/075
... सुषुम्ना मध्यनाड्यनर्गला कफाद्यर्गलरहिता भवेत्।
H.P.J.003/003
तदा शून्यपदवी सुषुम्ना प्राणस्य वायो राज्ञां पन्था...।
H.P.J.003/004
सुषुम्नापर्यानाह-सुषुम्नेति।
H.P.J.003/005
...प्राप्त्युपायः सुषुम्ना, तस्य मुखेऽग्रभागे मुखेन सुषुम्नाद्वारं...।
H.P.J.003/011
वायुं पवनमूर्ध्वत उपरि सुषुम्नायां धारयेत्।
H.P.J.003/012
...सुषुम्नायां प्रविष्टे प्राणे द्वयोः पुटयोः प्राणवियोगात्।
H.P.J.003/023
...सुषुम्नातिरिक्तानामूर्ध्वमुपरि वायोर्गतिरूर्ध्वगतिस्तस्या...।
H.P.J.003/028
...इडापिङ्गलासुषुम्ना ग्राह्यास्तेषां सम्बन्धः।
H.P.J.003/052
मेरुवत् सर्वोन्नता सुषुम्ना मेरुस्तस्य मूर्धा...।
H.P.J.003/052
...इडापिङ्गला सुषुम्नागान्धारप्रभृतीनां...।
H.P.J.003/055
...बन्धेन बद्धो निरुद्धः प्राणःसुषुम्नायां...।
H.P.J.003/055
मध्यनाड्यामुड्डीयते सुषुम्नां विहायसां...।
H.P.J.003/055
सुषुम्नायामुड्डीयतेऽनेन बद्धः प्राण इत्युड्डीयनम्।
H.P.J.003/060
उड्डियानबन्धे कृते विहङ्गमगत्या सुषुम्नायां प्राणस्य...।
H.P.J.003/062
...सुषुम्नायामूर्ध्वगमनशीलं कुरुते।
H.P.J.003/063
यथा येन प्रकारेण समीरणो वायुरूर्ध्वं सुषुम्नाया...।
H.P.J.003/064
मूलबन्धे कृतेऽपानः प्राणेन सहैकीभूय सुषुम्नायां...।
H.P.J.003/069
...भुजङ्गीव ब्रह्मनाडी सुषुम्ना तस्या अन्तरं मध्यं...।
H.P.J.003/074
पश्चिमे पथि सुषुम्नामार्गे वाहयेद् गमयेत् प्राणमिति शेषः।
H.P.J.003/117
...निर्भयं निःशङ्कं चालनादसौ शक्तिः सुषुम्नायां...।
H.P.J.003/118
...सुषुम्नाया मुखं प्रवेशमार्गं ध्रुवं निश्चितं जहाति...।
H.P.J.003/118
...सुषुम्नां व्रजति गच्छति।
H.P.J.003/119
यस्माच्छक्तिचालनेन प्राणः सुषुम्नां व्रजति तस्मात्...।
H.P.J.003/124
इयं मध्यमा नाडी सुषुम्ना योगिनां...।
H.P.J.004/014
...प्राप्ते सति वायौ प्राणे मध्यमे सुषुम्नायां व्रजति...।
H.P.J.004/016
सुषुम्ना मध्यनाडी तस्याः सद्भेदं शोभनं भेदनप्रकारं...।
H.P.J.004/017
...कालस्याभावादुक्तं भोक्त्री सुषुम्ना कालस्येति।
H.P.J.004/017
सुषुम्ना सरस्वती कालस्य सूर्याचन्द्रमोभ्यां कृतस्य...।
H.P.J.004/018
सुषुम्ना मध्या नाडी शाम्भवी शक्तिरस्ति।
H.P.J.004/019
...अनिरोधतोऽप्रतिबन्धात् सुषुम्नायां सरस्वत्यां प्रविशेत्...।
H.P.J.004/042
सूर्यचन्द्रयोर्निरोधे कृते सुषुम्नान्तर्गते प्राणे मनःस्थैर्यात्।
H.P.J.004/042
...'सुषुम्नान्तर्गते वायौ मनःस्थैर्यं प्रजायते' इति।
H.P.J.004/046
...सुषुम्नां पश्चिमे मुखे पूरयेत्।
H.P.J.004/047
सुषुम्नां प्राणेनेति शेषः।

H.P.J.004/052
एवमुक्तप्रकारेण वायुमार्गे प्राणमार्गे सुषुम्नायमित्यर्थः।
H.P.J.004/064
सुषुम्नादिभ्यः कृतकृत्यस्ताः प्रणमति-सुषुम्नायै इति।
H.P.J.004/064
सषुम्ना मध्यनाडी तस्यै कुण्डलिन्यै आधारशक्त्यै...।
H.P.J.004/068
शुद्धा प्राणायामैर्मलरहिता या सुषुम्नासरणिः...।
H.P.J.004/068
...सुषुम्नापद्धतिस्तस्याममलो नादः स्फुटं व्यक्तं श्रूयते।
H.P.J.004/114
मध्यमार्गे सुषुम्नायां चरन् गच्छन् मारुतः प्राणवायुः...।
H.P.J.004/114
सुषुम्नायामसञ्चरन् वायुरसिद्ध इत्युच्यते ।
Y.S.214
बोधयित्वा सुषुम्नायां प्रविशेदविरोधतः।
Y.S.216
महापथं श्मशानं च सुषुम्नाप्येकमेव हि।
Y.S.219
यस्य चित्तं सपवनं सुषुम्नां प्रविशेदिह।
Y.T.006
प्रत्यङ्मुखत्वात्प्रविशन्सुषुम्नां...।

सुषुम्नाद्वार

H.P.J.003/005
...सुषुम्ना, तस्य मुखेऽग्रभागे मुखेन सुषुम्नाद्वारं...।

सुषुम्नानाडि

H.P.J.002/006
...सुषुम्नानाड्यां स्थिता मलाः शुद्धिमपगमं प्रयान्ति...।

सुषुम्नाप्रवेश

H.P.J.004/019
...वायोः सुषुम्नाप्रवेशार्थमभ्यासः कर्तव्य इत्यर्थः।

सुषुम्नाभेद

H.P.J.002/072
सुषुम्नाभेदानन्तरं यदा सुषुम्नान्तः षट्शब्दा भवन्ति तदा...।

सुषुम्नामध्य

H.P.J.003/027
...सुषुम्नामध्ये गच्छतीति मध्यगो वायुः स्फुरति।

सुषुम्नामार्ग

H.P.J.001/029
...पश्चिमवाहिनं पश्चिमेन पश्चिममार्गेण सुषुम्नामार्गेण...।
H.P.J.001/048
...मूलबन्धं कृत्वा सुषुम्नामार्गेण प्राणमूर्ध्वं...।
H.P.J.001/048
कुण्डलिनीबोधे सुषुम्नामार्गेण प्राणो ब्रह्मरन्ध्रं गच्छति।
H.P.J.001/049
...मारुतं वायुं सुषुम्नामार्गेण मूर्धानं नीत्वेति...।
H.P.J.003/043
सुषुम्नामार्गेण बिन्दुस्थानं गच्छति।
H.P.J.003/105
...शक्त्या मोक्षद्वारं मोक्षस्य द्वारं प्रापकं सुषुम्नामार्गं...।
H.P.J.003/106
येन मार्गेण सुषुम्नामार्गेण गन्तव्यं गमनार्हमस्ति तद्द्वारं...।
H.P.J.003/109
...भावनाद्वा गङ्गायमुने इडापिङ्गले तयोर्मध्ये सुषुम्नामार्गे...।
H.P.J.004/017
यदा सुषुम्नामार्गेण वायुर्ब्रह्मरन्ध्रे...रात्रिंदिवात्मकस्य...।
H.P.J.004/099
...सन्धानं सुषुम्नामार्गेण ब्रह्मरन्ध्रे निरोधनम्...।

सुषुम्नामुख

H.P.J.003/118
सुषुम्नामुखात् प्रागेव कुण्डलिन्या निर्गतत्वादिति भावः।

सुषुम्नावाहिन्

H.P.J.004/012
प्राणे वायौ सुषुम्नावाहिनी मध्यनाडीप्रवाहिणि सति...।

सुषुम्नावाहिनी

H.P.J.004/020
प्राणे सुषुम्नावाहिन्यसति...सुषुम्नेतरनाड्यभ्यासाः...।
H.P.J.004/020
प्राणे सुषुम्नावाहिनी सति मनोन्मनी...।

सुसंयत

B.Y.Y.007/135
नात्युच्छ्रिते नातिनीचे दर्भपाणिः सुसंयतः ।

सुस्थान

H.P.J.004/016

...सुस्थाने शोभने स्थाने 'सुराज्ये धार्मिक देशे'...।

सुस्थिर

H.P.J.001/035

हृदये हृदयसमीपे हनुं चिबुकं सुस्थिरं सम्यक् स्थिरं...।

H.P.J.001/048

दृढतरमतिशयेन दृढं सुस्थिरं पद्मासनं...।

सुस्निग्ध

H.P.J.001/038

मिताहारो वक्ष्यमाणः, 'सुस्निग्धमधुराहारः' इत्यादिना।

H.P.J.001/058

...मिताहार इत्यपेक्षायामाह-सुस्निग्धेति।

H.P.J.001/058

सुस्निग्धोऽतिस्निग्धः स चासौ मधुरश्च तादृश...।

H.P.J.002/029

सुस्निग्धं सुष्ठु स्निग्धं ग्रन्थ्यादिरहितं सूत्रम्।

सुहृद्

Y.S.333

कारुण्याद्यः...सुखदुःखसुहृद् योगशास्त्रस्य नाथः ।

सूक्त

B.Y.Y.006/005

आपोहिष्ठा ऋचस्तिस्रः सूक्तं चैवाघमर्षणम् ।

B.Y.Y.006/029

अघमर्षणसूक्तेन अश्वमेधावभृत्समम् ।

B.Y.Y.007/024

वारुणीश्च ऋचः सूक्तं शक्तितश्च प्रयोजयेत् ।

B.Y.Y.007/028

अन्यानि चैव सूक्तानि स्मार्तदृष्टान्यनुस्मरेत् ।

B.Y.Y.007/054

विभ्राडित्यनुवाकेन सूक्तेन पुरुषस्य च ।

B.Y.Y.007/170

अघमर्षणसूक्तेन त्रिरावृत्तेन नित्यशः ।

B.Y.Y.007/172

अघमर्षणसूक्तस्य ऋषिश्चैवाघमर्षणः ।

B.Y.Y.007/174

सूक्तेऽस्मिन् व्याहृतं सर्वमेतन्मन्त्रार्थमस्य वै ।

B.Y.Y.007/188

अघमर्षणसूक्तेन मार्जनं कारयेत्ततः ।

सूक्ष्म

B.Y.Y.002/016

सूर्यस्यान्तर्गतं सूक्ष्मं विष्णुं दिव्यं निरञ्जनम् ।

B.Y.Y.002/030

आद्या परतरा सूक्ष्मा शान्ता गान्धर्वनिरवयवा ।

B.Y.Y.002/136

चेतनाधिष्ठितं सूक्ष्मं तथा सूक्ष्मैः सहैव तत् ।

B.Y.Y.006/021

संधिते तु परे सूक्ष्मे निर्गुणे गुणबोधिनी ।

B.Y.Y.006/023

हृद्याकाशगता सूक्ष्मा आदित्यरश्मिरेखया ।

B.Y.Y.008/053

तथैव वायवः सूक्ष्मा निरोद्धव्याः प्रयत्नतः ।

B.Y.Y.009/026

तस्य चान्तर्गतं धाम सूक्ष्मं प्राकाश्यमेव च ।

B.Y.Y.009/105

यजुः शक्ला च गुह्या च तनुः सूक्ष्मा च मण्डले ।

B.Y.Y.009/107

पुरुषान्तर्गतं सूक्ष्मं शुक्लाच्छुक्लतरं हि तत् ।

B.Y.Y.011/025

स्थूलं सूक्ष्मं च बोद्धव्यं ब्राह्मणेन प्रयत्नतः ।

B.Y.Y.011/028

यत् स्थूलं तादृशं ज्ञेयं सूक्ष्मं तण्डुलवत् स्मृतम् ।

B.Y.Y.011/031

सूक्ष्मं तत् परमं गुह्यं त्रयं ब्रह्म सनातनम् ।

H.P.J.002/024

...तच्च सूक्ष्मं नूतनोष्णीषादेः खण्डं ग्राह्यम्।

H.P.J.002/030

दिव्यां सूक्ष्मपदार्थग्राहिणीं दृष्टिं प्रकर्षेण दातुं...।

H.P.J.004/015

...व्यवहितविप्रकृष्टसूक्ष्मार्थमात्मानमपि यथार्थं पश्यन्ति।

H.P.J.004/084

...सूक्ष्मसूक्ष्मकः सूक्ष्मः सूक्ष्म एव श्रूयते श्रवणविषयो...।

H.P.J.004/087

...सत्यपि तत्र तेषु नादेषु सूक्ष्मात् सूक्ष्मतरमतिसूक्ष्मं...।

H.P.J.004/088

घनं महान्तं नादं मेघभेर्यादिकमुत्सृज्य त्यक्त्वा सूक्ष्मे...।

H.P.J.004/088
...किङ्किणीभ्रमरादिस्वने वा सूक्ष्ममुत्सृज्य घने वा नादे...।
H.P.J.004/088
...घनसूक्ष्मान्यतरनादग्रहणं...क्रीडन्तमपि क्षिप्तं...।
H.P.J.004/089
वा अथवा यत्रकुत्रापि नादे यस्मिन्कस्मिंश्चिद्घने सूक्ष्मे...।
V.S.004/022
स्थूलं सूक्ष्ममनाकाशमसंस्पृष्टमचाक्षुषम् ।
V.S.005/012
सूक्ष्मे लिङ्गशरीरेऽस्मिन्नवच्छिन्नात्मनः सदा ।
Y.S.107
सुशोभनं मठं कुर्यात्सूक्ष्मद्वारं तु निर्घुणम्।

सूक्ष्मता

H.P.J.003/008
...प्रकृत्यपगमे परमाणुवद् देहस्य सूक्ष्मता।

सूक्ष्मनाद

H.P.J.004/087
सूक्ष्मस्य नादस्य चिरस्थायित्वात् तत्रासक्तं...।

सूक्ष्मरूप

H.P.J.003/100
तन्मध्ये देवताः सर्वास्तिष्ठन्ते सूक्ष्मरूपतः।

सूक्ष्मलक्ष्य

H.P.J.002/031
...तल्लक्ष्यं च सूक्ष्मलक्ष्यमश्रूणां सम्यक् पातः पतनं...।

सूक्ष्मा

B.Y.Y.002/012
तस्यच मात्रास्तिस्रो व्यक्ताऽव्यक्ता तथा परा सूक्ष्मा ।
V.S.002/026
अव्यक्ता चैव विज्ञेया सूक्ष्मा सा वैष्णवी स्मृता ।
V.S.003/043
अधस्तादण्डयोः सूक्ष्मां सव्योपरि च दक्षिणम् ।

सूक्ष्माकार

B.Y.Y.002/112
ओंकारं विपुलमचिन्त्यमप्रमेयं सूक्ष्माकारं...।

सूत्र

H.P.J.002/029
अथ नेतिकर्माह-सूत्रमिति।
H.P.J.002/029
सुस्निग्धं सुष्ठु स्निग्धं ग्रन्थ्यादिरहितं सूत्रम्।
H.P.J.002/029
यावता सूत्रेण सम्यग् नेतिकर्म भवेत् तावद् ग्राह्यम्।
H.P.J.004/114
अधीत्य वेदं सूत्रं वा पुराणं सेतिहासकम्।
H.P.J.004/114
'क्लेशतनूकरणार्थश्च' इत्युत्तरसूत्रेण स्पष्टीकृतं पतञ्जलिना।
V.S.003/039
ब्रह्मरन्ध्रे सुषुम्णाया मृणालान्तरसूत्रवत् ।

सूत्रप्रान्त

H.P.J.002/029
पुनःपुनरेवं कुर्वत इतरनासानाले सूत्रप्रान्तमायाति...।
H.P.J.002/029
सूत्रप्रान्तं नासानाले...नासापुटमङ्गुल्या निरुध्य पूरकं...।
H.P.J.002/029
पुनश्च मुखेन रेचयेतपुनः...मुखे सूत्रप्रान्तमायाति।
H.P.J.002/029
तत्सूत्रप्रान्तं नासाबहिःस्थसूत्रप्रान्तं च गृहीत्वा...।
H.P.J.002/029
तत्प्रकारस्त्वेकस्मिन् नासानाले सूत्रप्रान्तं...।

सूप

H.P.J.001/060
पश्चादग्निसंयोगेनोष्णीकृतं...सूपौदनरोटिकादि...।

सूर्य

B.Y.Y.001/015
सूर्यस्य चाप्युपस्थानं कुर्यान्मन्त्रैः किमात्मकैः ।
B.Y.Y.002/016
सूर्यस्यान्तर्गतं सूक्ष्मं विष्णुं दिव्यं निरञ्जनम् ।
B.Y.Y.004/009
ब्रह्माग्निवायुसूर्याश्य देवत्यं समुदाहतम् ।
B.Y.Y.006/013
अहन्यहनि चे सर्वे सूर्यमिच्छन्ति खादितुम् ।
B.Y.Y.006/013
अथ सूर्यस्य तेषां च युद्धमासीत् सुदारुणम् ।
B.Y.Y.006/023
सोमसूर्याग्निसंस्कृत्या अण्डं भित्त्वा विनिर्गता ।
B.Y.Y.007/053
एतज्जपेदूर्ध्वबाहुः सूर्यमीक्षन् समाहितः ।

B.Y.Y.007/102
स्वयंभूरित्युपस्थाय सूर्यस्येति प्रदक्षिणा ।
B.Y.Y.008/040
प्राणायामशतं कुर्युः सूर्यस्योदयनं प्रति ।
B.Y.Y.008/041
सूर्यस्योदयनं प्राप्य निर्मला गतकिल्बिषाः ।
B.Y.Y.009/017
संयोगश्चेतनोऽस्माकं प्रकाशश्चाग्निसूर्ययोः ।
B.Y.Y.009/020
न तद्भासयते सूर्यो न शशाङ्को न पावकाः ।
B.Y.Y.009/024
हृव्योम्नि तपति ह्येष बाह्ये सूर्यः स चान्तरे ।
B.Y.Y.009/047
शश्वत्प्रसूयणात् सूर्यः पावनात् पवनः स्मृतः ।
B.Y.Y.009/058
ध्यानेन पुरुषो यस्तु द्रष्टव्यः सूर्यमण्डले ।
B.Y.Y.009/088
सूर्य आत्मा तु जगतः प्राणाख्यो हृदि संस्थितः ।
B.Y.Y.009/100
सा सूर्ये चैव हृदये परे ब्रह्मणि संस्थिता ।
B.Y.Y.009/101
ते सूर्यस्य द्वारेण विरजाः प्रयान्ति ।
B.Y.Y.009/107
स सुर्ये ज्योतिरित्युक्तं बहिस्तेजो विनिर्गतम् ।
B.Y.Y.009/108
भूर्भुवः स्वरिति यः सूर्ये ज्योतिरितीति च ।
B.Y.Y.009/110
तस्य यद्धृदयावस्थं ज्योतिः सूर्यः स उच्यते ।
B.Y.Y.009/130
सूर्यं भित्वा यथा चन्द्रश्चन्द्रमाश्च तथामृतम् ।
B.Y.Y.009/147
अन्नार्थी चाप्ययं सूर्यो रसान् गृह्णाति रश्मिभिः ।
B.Y.Y.009/165
नीडमध्यगतं सूर्यं न च पश्यन्ति चक्षुषा ।
B.Y.Y.009/193
सहस्रकरपन्नेत्रः सूर्यवर्चाः सहस्रधा।
B.Y.Y.010/001
उपस्थानं प्रवक्ष्यामि सूर्यस्य क्रियते यथा ।
B.Y.Y.010/002
सूर्यस्य चाप्युपस्थानं गायत्र्याः प्रत्यहं जपः ।

B.Y.Y.010/004
वक्ष्यमाणैः प्रयत्नेन सूर्यस्य विषयाद्बुधः ।
B.Y.Y.010/017
सूर्योपस्थाननिरतास्तस्य सायुज्यभागिनः ।
H.P.J.001/001
...हश्च ठश्च हठौ सूर्यचन्द्रौ तयोर्योगो हठयोगः...।
H.P.J.001/001
...एतेन हठशब्दवाच्ययोः सूर्यचन्द्राख्ययोः...।
H.P.J.001/001
हकारः कीर्तितः सूर्यष्ठकारश्चन्द्र उच्यते।
H.P.J.001/001
सूर्याचन्द्रमसोर्योगाद्धठयोगो निगद्यते।
H.P.J.002/007
भूयः पुनः सूर्येण सूर्यनाड्या पिङ्गलया रेचयेत्।
H.P.J.002/008
सूर्येण सूर्यनाड्या पिङ्गलया प्राणमाकृष्य...।
H.P.J.002/009
येन चन्द्रेण सूर्येण वा त्यजेत् रेचयेत्...।
H.P.J.002/010
...सूर्यश्च चन्द्रमाश्च सूर्याचन्द्रमसौ तयोः।
H.P.J.002/010
...कुम्भयित्वा सूर्येण रेचयेत्, सूर्येणापूर्य...।
H.P.J.002/049
अतएव सूर्याचन्द्रमसोरभ्यासे 'धारयित्वा यथाशक्ति'...।
H.P.J.002/050
सूर्येणापूर्य कुम्भयित्वा चन्द्रेण रेचनमिति...।
H.P.J.003/015
सम्यगभ्यस्य सूर्येण पिङ्गलयोपलक्षितमङ्गं सूर्याङ्गं...।
H.P.J.003/028
...सोमसूर्याग्निशब्दैस्तदधिष्ठिता नाड्य...।
H.P.J.003/028
सोमश्च सूर्यश्चाग्निश्च सोमसूर्याग्नयः...।
H.P.J.003/077
...सूर्यो नाभिस्थोऽनलात्मकः ग्रसते ग्रासीकरोति।
H.P.J.003/077
...सूर्यकर्तृकामृतग्रसनेन पिण्डो देहो जरायुतः जरसा...।
H.P.J.003/078
तत्र तद्विषये सूर्यस्य नाभिस्थानलस्य मुखं...।
H.P.J.003/079
...अधस्तालोर्योगिन...भानुर्दहनात्मकः सूर्यो भवति।

H.P.J.003/079
ऊर्ध्वाध:स्थितयोश्चन्द्रसूर्ययोरधऊर्ध्वकरणेनान्वर्था...।
H.P.J.003/081
ऊर्ध्वाध:स्थितयोश्चन्द्रसूर्ययोरधऊर्ध्वकरणक्रियामाह।
H.P.J.003/100
बिन्दुश्चन्द्रमय: प्रोक्तो रज: सूर्यमयं तथा।
H.P.J.003/112
सा कुण्डली सूर्यादापूर्य सूर्यात् पूरणं कृत्वा परिधाने...।
H.P.J.003/116
भानोर्नाभिदेशस्थस्य सूर्यस्याकुञ्चनं कुर्यात्।
H.P.J.004/017
प्राणलये कालजयो भवतीत्याह-सूर्याचन्द्रमसाविति।
H.P.J.004/017
सार्धं घटिकाद्वयं सूर्यो वहति...।
H.P.J.004/017
यदा सूर्यो वहति तदा दिनमुच्यते।
H.P.J.004/017
सूर्यश्च चन्द्रमाश्च सूर्याचन्द्रमसौ।
H.P.J.004/017
सुषुम्ना सरस्वती कालस्य सूर्याचन्द्रमोभ्यां कृतस्य...।
H.P.J.004/041
...निश्चलत्वं तेन चन्द्रार्कौ चन्द्रसूर्यावपि लीनतां...।
H.P.J.004/042
दिवा सूर्य सञ्चारे लिङ्गं सर्वकारणमात्मानम्।
H.P.J.004/042
चन्द्रसूर्यसञ्चारे चित्तस्थैर्याभावात्।
H.P.J.004/042
दिवारात्रिनिरोधत: सूर्यचन्द्रौ निरुध्य।
H.P.J.004/042
सूर्यचन्द्रयोर्निरोधे कृते सुषुम्नान्तर्गते प्राणे मन:स्थैर्यात्।
H.P.J.004/045
सूर्याचन्द्रमसोरिति।
H.P.J.004/045
सूर्याचन्द्रमसोरिडापिङ्गलयोर्मध्ये निरालम्बं...।
H.P.J.004/048
यद्वा सूर्यचन्द्रयोर्निरोधादायु:क्षयकारक: काल:...।
V.S.002/029
चन्द्रस्तामस इत्युक्त: सूर्यो राजस उच्यते ।

सूर्यदेवता

B.Y.Y.004/064
तृतीयं सूर्यदैवत्यं चतुर्थं वैद्युतं स्मृतम् ।

सूर्यनमस्कार

H.P.J.001/061
...बहुसूर्यनमस्कारादिरूपां बहुभारोद्वहनादिरूपां च।

सूर्यनाडी

H.P.J.002/064
...लघु क्षिप्रमेवोदरं पूर्णं भवेत्...सूर्यनाड्या पूरयेत्।

सूर्यभेद

H.P.J.001/055
...मुद्रा आदिर्यस्या: सूर्यभेदादेस्तादृशीम्।
H.P.J.002/072
...तावत्पर्यन्तं सहितकुम्भकं सूर्यभेदादिकमभ्यसेदनुतिष्ठेत्।

सूर्यभेदन

H.P.J.001/056
...'सूर्यभेदनमुज्जायी' इत्यादिवक्ष्यमाणम्।
H.P.J.001/067
...अनेकविधा: कुम्भका: सूर्यभेदादय:...।
H.P.J.002/043
...उन्मन्यवस्थासिद्धये चित्रान् सूर्यभेदनादिभेदेन...।
H.P.J.002/044
अथाष्टकुम्भकान् नामभिर्निर्दिशति-सूर्यभेदनमिति।
H.P.J.002/048
...सूर्यभेदनं तद्गुणांश्चाह त्रिभि:-आसन इति।
H.P.J.002/048
सूर्यभेदनमभ्यस्य बन्धपूर्वकमेकधी:।
H.P.J.002/050
...सूर्यभेदनं सूर्यभेदनाख्यमुक्तं योगिभिरिति शेष:।
H.P.J.002/051
प्राणं पूर्ववत् पूर्वेण सूर्यभेदनेन तुल्यं पूर्ववत्।
H.P.J.002/057
पूर्ववत् सूर्यभेदनवत् कुम्भस्य कुम्भकस्य...।
H.P.J.002/066
...सूर्यभेदनोज्जायिनावुष्णौ प्रायेण शीते हितौ।
H.P.J.002/066
...कुम्भकानां सर्वरोगहरत्वे...सूर्यभेदनं...वातहरम्।

H.P.J.002/067
सूर्यभेदनादयस्तु यथासम्भवं कर्तव्याः।
H.P.J.002/071
...सूर्यभेदनादयः पूरकपूर्वकस्य कुम्भकस्य भेदा ज्ञातव्याः।

सूर्यमण्डल

B.Y.Y.009/168
ऊर्ध्वमेकःस्थितस्तेषां यो भित्वा सूर्यमण्डलम् ।

सूर्याङ्ग

H.P.J.003/015
सम्यगभ्यस्य सूर्येण पिङ्गलयोपलक्षितमङ्गं सूर्याङ्गं...।
H.P.J.003/015
...तस्मिन् सूर्याङ्गे दक्षाङ्गे पुनर्वामाङ्गाभ्यासानन्तरं...।

सूर्यास्त

H.P.J.003/112
सायं सूर्यास्तसमये प्रातः सूर्योदयवेलायां नित्यमहरहः...।

सूर्योदयवेला

H.P.J.003/112
सायं सूर्यास्तसमये प्रातः सूर्योदयवेलायां नित्यमहरहः...।

सृक्

H.P.J.002/028
धातवो 'रसासृङ्मांसमेदोऽस्थिमज्ञाशुक्राणि धातवः'...।

सृष्टि

B.Y.Y.002/028
मात्रा स्वप्नविकल्पा सृष्टिः संज्ञा द्वितीया स्यात् ।
B.Y.Y.009/130
तस्य मध्येंकुसं(?) विद्यात्ततः सृष्टिः प्रजायते ।
B.Y.Y.009/196
अर्थानां छन्दतः सृष्टियोगसिद्धेस्तु लक्षणम् ।
H.P.J.002/055
तस्य संमान्यः संसेव्यः सृष्टिः प्रपञ्चोत्पत्तिः...।
H.P.J.003/054
सृष्टिमयं सृष्टिरूपं प्रणवाख्यं बीजमेकं मुख्यम् ।
H.P.J.003/100
अनयोर्बाह्ययोगेन सृष्टिः सञ्जायते नृणाम्।
H.P.J.004/077
असौ नादानुसन्धानपरो योगी सृष्टिसंहारकर्ता सृष्टिं...।

V.S.003/004
सृष्टिस्थित्यात्मकावेतौ मकारोन्त्योन्तकः स्मृतः ।
V.S.004/050
कल्पान्तानलवद्वर्णं सृष्टिस्थित्यन्तकारणम् ।

सैन्धव

H.P.J.003/035
ततश्छेदनानन्तरं चूर्णिताभ्यां चूर्णीकृताभ्यां सैन्धवं...।
H.P.J.003/035
सप्तदिनपर्यन्तं छेदनं सैन्धवपथ्याभ्यां घर्षणं...।
H.P.J.003/035
मूले सैन्धवोक्तिस्तु हठाभ्यासात् पूर्वं खेचरीसाधन...।
H.P.J.004/005
यद्वद्यथा सैन्धवं सिन्धुदेशोद्भवं लवणं सलिले जले...।
H.P.J.004/059
यथा सलिले जले सन्धीयमानं सैन्धवं लवणं विलीयते...।

सोऽहम्

V.S.004/031
सोऽहमात्मनि विज्ञानं ध्यानं तत् सगुणं स्मृतम् ।
V.S.004/037
ज्ञात्वा वैश्वानरं देवं सोऽहमेवेति या मतिः ।
V.S.004/040
मनसालोक्य सोऽहं स्यामप्येतद्ध्यानमुत्तमम् ।
V.S.004/053
सोऽहमात्मेति या बुद्धिः सा च ध्याने प्रशस्यते ।
V.S.006/048
सोऽहमोमितिमन्त्रेण यजन्मृत्युञ्जयो भवेत् ।

सोपान

B.Y.Y.011/005
तेषां फलं तु संयोज्य लोकान् सोपानवत् क्रमात् ।

सोम

B.Y.Y.002/028
ब्रह्मान्तरिक्षसंज्ञो मनोरजः सोमसंज्ञक उकारः ।
B.Y.Y.002/098
शरीरमापः सोमश्च त्रिभोज्यमिति कीर्तितम् ।
B.Y.Y.004/023
तत्तालुनि निविष्टं तु तुर्याख्यं सोमरूपकम् ।
B.Y.Y.004/035
श्येनो भूत्वाऽऽहरत् सोमं त्रिदिवात् स्वेन तेजसा ।

B.Y.Y.004/052
गायत्रीं जपते यस्तु सोमवद्भासते तु सः ।
B.Y.Y.006/023
सोमसूर्याग्निसंस्कृत्या अण्डं भित्त्वा विनिर्गता ।
B.Y.Y.007/078
कव्यवाडनलं सोम यममर्यमणं तथा ।
B.Y.Y.007/078
अग्निष्वात्तान् सोमपांश्च तथा बर्हिषदः पितृन् ।
B.Y.Y.009/070
रौद्र (द्रं) तेजः स्वकीयं च अग्नीषोमौ तथैव च ।
B.Y.Y.009/096
पाचिकाप्यायिके ह्येते अग्नीषोमात्मके स्मृते ।
B.Y.Y.009/128
रविमध्ये स्थितः सोमः सोममध्ये हुताशनः ।
B.Y.Y.009/137
शरीरमापः सोमश्च त्रिविधं ह्यन्नमुच्यते ।
H.P.J.003/028
...सोमसूर्याग्निशब्दैस्तदधिष्ठिता नाड्य...।
H.P.J.003/028
सोमश्च सूर्यश्चाग्निश्च सोमसूर्याग्नयः...।
H.P.J.003/044
सोमस्य लम्बिकोर्ध्वविवरगलितचन्द्रामृतस्य...।
H.P.J.003/049
यः सारः चन्द्राद् भ्रुवोरन्तर्वामभागस्थात् सोमात्...।
H.P.J.003/052
...मुखमग्रमस्ति चन्द्रात् सोमाद्...।
H.P.J.003/077
...दिव्यरूपिणश्चन्द्रात् सोमात् तालुमूलस्थाद् यत्किमप्यमृतं...।
H.P.J.003/126
'सोमोऽस्माकं ब्राह्मणानां राजा' इति श्रुतेः।
H.P.J.004/046
सोमादिति-सोमाच्चन्द्राद् यत्र यस्यां खेचर्यां धारा...।
V.S.004/041
उन्निद्रहृदयाम्भोजे सोममण्डलमध्यगे।

सोमकला

H.P.J.003/045
यस्य योगिनः शरीरं नित्यं प्रतिदिनं सोमकलापूर्णं...।

सोमकलाजल

H.P.J.003/052
...यत्प्रालेयं सोमकलाजलं प्रहितं निहितं यस्मिन् तत्तथा...।

सोमकलापूर्ण

H.P.J.003/046
तथा सोमकलापूर्णं चन्द्रकलामृतपूर्णं देह शरीरं...।

सोमकलामृत

H.P.J.003/050
अतएव रसस्य सोमकलामृतस्य स्यन्दः स्यन्दनं...।

सोमकलारस

H.P.J.003/051
...तत्कलाजलं च सोमकलारसं यः पुमान् पिबेत्...।

सोमपान

H.P.J.003/044
...पानं सोमपानं यः पुमान् करोति।

सोमभाग

V.S.005/023
विषं भास्करभागे स्यात् सोमभागेऽमृतं तथा।

सोममध्यस्थ

B.Y.Y.009/127
एतद्धि सोममध्यस्थममृतं ज्योतिरूपकम्।

सोमात्मक

B.Y.Y.009/046
अग्नीषोमात्मकं बिभ्रदैश्वरूपेण कर्मणा।

सौन्दर्य

H.P.J.003/025
रूपं सौंदर्यं चक्षुः- प्रियो गुणः, लावण्यं कान्तिविशेषः।

सौमिक

B.Y.Y.007/075
ब्राह्मं दैवं तथा पैत्रं प्राजापत्यं तु सौमिकम्।

सौर

B.Y.Y.004/054
रुद्रकृष्माण्डजप्यैश्च जप्यैः सौरार्णकैस्तथा ।
B.Y.Y.007/150
सौरान् मन्त्रान् यथोत्साहं पावमानीश्च शक्तितः ।

V.S.004/055
ध्यानेनानेन सौरेण मुक्तिं यान्तीह सूरयः ।
V.S.005/040
राहुः कुजो रविः सौरिरेते दक्षिणतः शुभाः ।

सौरमन्त्र

B.Y.Y.007/055
दिवा कीर्त्यैस्तथान्यैश्च सौरैर्मन्त्रैश्च शक्तितः ।

सौवीर

H.P.J.001/059
...सौवीरं काञ्जिकम्, तैलं तिलसर्षपादिस्नेहः...।

सौषुप्ताख्या

B.Y.Y.002/029
संहरति जगत् कृत्स्नं सा सौषुप्ताख्या महानिद्रा ।

स्कन्दपुराण

H.P.J.001/060
स्कन्दपुराणेऽपि-'त्यजेत् कट्वम्ललवणं क्षीरभोजी...।
H.P.J.002/012
स्कन्दपुराणे-'एकश्वासमयी मात्रा प्राणायामो निगद्यते'।
H.P.J.002/012
इति स्कन्दपुराणात्।
H.P.J.002/012
तदुक्तं स्कन्दपुराणे- ।
H.P.J.004/113
स्कन्दपुराणे- यदेभिरन्तरायैर्न क्षिप्यतेऽस्य हि मानसम्।

स्कन्ध

H.P.J.002/033
नतौ नम्रीभूतावंसौ स्कन्धौ यस्य स नतांसः...।
H.P.J.003/081
...बाहुभ्यां स्कन्धाभ्यां गलपृष्ठभागशिरः...।
H.P.J.003/093
...स्वङ्गानि मूर्धललाटनेत्रहृदयस्कन्धभुजादीनि...।
H.P.J.003/098
उत्तमाङ्गेषु शिरःकपालनेत्रस्कन्धकण्ठहृदयभुजादिषु...।
H.P.J.003/121
...तत्कायं कुरुते पुनर्नवतरं छिन्नद्रुमस्कन्धवत्।
V.S.003/044
समग्रीवशिरः स्कन्धः समपृष्ठः समोदरः ।

स्कन्धसन्धि

H.P.J.002/030
जत्रुणोः स्कन्धसन्ध्योरूर्ध्वमुपरिभागे...जत्रूर्ध्वजातः...।

स्खलन

H.P.J.003/042
तस्य बिन्दुर्वीर्यं न क्षरते न स्खलति।
H.P.J.003/043
चलितोऽपि स्खलितोऽपि बिन्दुर्यदा यस्मिन् काले...।

स्तन

B.Y.Y.005/009
जठरे स्तने च हृदये कण्ठे वक्त्रे च तालुनि ।

स्तब्ध

H.P.J.004/099
...स्तब्धो निश्चलो योऽन्तःकरणमेव हरिणो मृगस्तस्य...।

स्तम्भ

H.P.J.003/073
...इडापिङ्गले स्तम्भयेद् बन्धयेद्, अयं जालन्धर इति...।
H.P.J.004/041
...निश्चलत्वेन प्राणसञ्चारमपि स्तम्भयन्नित्यर्थः।
V.S.005/036
आग्नेयांशे चरन्नूर्ध्वं पार्थिवस्तम्भपार्श्वतः ।

स्तम्भित

Y.T.011
खे स्तम्भिते केवलकुम्भकेन।

स्त्यान

H.P.J.001/017
...'व्याधिस्त्यानसंशयप्रमादालस्याविरति...।

स्तिमित

Y.T.011
त्रिकूटनाम्नि स्तिमितेऽन्तरङ्गे।

स्त्री

B.Y.Y.007/147
स्त्रीशूद्रपतितांश्चैव पाषण्डिनं रजस्वलाम् ।
H.P.J.001/011
ब्राह्मणक्षत्रियविशां स्त्रीशूद्राणां च पावनम्।

H.P.J.001/061
वह्निश्च स्त्री...पन्थाश्च...वह्निसेवनस्त्रीसङ्गतीर्थयात्रा...।
H.P.J.001/061
वह्निस्त्रीपथिसेवनं व्याख्यातम् ।
H.P.J.003/091
...ऋतुमत्या ऋतुस्नातायाः स्त्रिया रजः स्वकीयं...।
H.P.J.003/093
...स्त्री च पुमांश्च स्त्रीपुंसौ तयोः स्त्रीपुंसयोः स्वाङ्गलेपनं...।
H.P.J.003/099
...स्त्री यदि रजो वज्रोल्या वज्रोलीमुद्रया रक्षेत्...।
H.P.J.003/100
बीजं च पौरुषं प्रोक्तं रजश्च स्त्रीसमुद्भवम्।
H.P.J.004/015
ब्राह्मणक्षत्रियविशां स्त्रीशूद्राणां च पावनम्।
H.P.J.004/113
स्त्रियो दानफलं विद्यां मायां कुष्यं धनं वसु।

स्त्रीपुंस

H.P.J.003/093
...स्त्री च पुमांश्च स्त्रीपुंसौ तयोः स्त्रीपुंसयोः स्वङ्गलेपनं...।

स्त्रीयोनि

H.P.J.003/087
नारीभगे स्त्रीयोनौ पततीति पतन् पतंश्चासौ बिन्दुश्च...।

स्त्रीसङ्ग

H.P.J.001/061
वह्निश्च स्त्री...पन्थाश्च...वह्निसेवनस्त्रीसङ्गतीर्थयात्रा...।
H.P.J.003/085
मेहनेन स्त्रीसङ्गानन्तरं बिन्दोः क्षरणेन पुरुषः...।
H.P.J.003/094
भोगेन स्त्रीसङ्गेन युक्तोऽपि मुक्तिदो मोक्षदः।

स्त्रीसङ्गम

Y.S.139
अतीव भोजनं त्याज्यं स्त्रीसङ्गमनमेव च।

स्त्रीसुख

H.P.J.004/015
स्वसंवेद्यं हि तद् ब्रह्म कुमारी स्त्रीसुखं यथा।

स्तुति

B.Y.Y.001/043
प्रतिष्ठानं स्तुतिश्चैव ब्राह्मणं तदिहोच्यते ।
H.P.J.004/114
स्तुतिस्मरणपूजाभिर्वाङ्मनःकायकर्मभिः।

स्तेन

B.Y.Y.009/076
स्तेनास्तेन हि जीवन्ति सौम्येन सुरमानवाः ।

स्तेय

B.Y.Y.004/055
ब्रह्महत्यां सुरापानं सुवर्णस्तेयमेव वा ।
B.Y.Y.007/155
अगम्यागमनात् स्तेयात् पापेभ्यश्च प्रतिग्रहात् ।

स्तेयपातक

H.P.J.003/048
...गोमांसभक्षणं तु महापातकानां स्वर्णस्तेयादीनां...।

स्तेयिन्

B.Y.Y.008/038
सुवर्णस्तेयि चौरश्च गोघ्नो विस्रम्भघातकः ।

स्तोत्र

B.Y.Y.002/150
सामसु ब्रह्ममुख्येषु ऋग्यजुस्तोत्रशस्त्रयोः ।
V.S.001/015
कादचित्तत्र गत्वाऽहं स्तुत्वा स्तोत्रैः प्रणम्य च ।

स्थल

B.Y.Y.007/042
न क्लिन्नवासाः स्थलगो जपादीन्याचरेद्बुधः ।
B.Y.Y.007/044
भागधेयं श्रुतिः प्राह तस्मान्निष्पीडयेत् स्थले ।
B.Y.Y.007/047
उदके चोदकस्थस्तु स्थलस्थश्च स्थले शुचिः ।
B.Y.Y.007/048
यत्राशुचिस्थलं वा स्यादुदके देवताः पितॄन् ।
V.S.004/007
आहन्मध्याद् भ्रुवोर्मध्यं यावद्वायुस्थलं स्मृतम् ।

स्थविर

H.P.J.003/058
स तु वृद्धोऽपि स्थविरोऽपि तरुणायते...।

स्थाणु

B.Y.Y.001/028
आपद्यते स्थाणुगर्ते स्वयं वाऽपि प्रमीयते ।

स्थाणुत्व

H.P.J.002/002
वाते चित्ते च निश्चले योगी स्थाणुत्वं...।

स्थान

B.Y.Y.002/119
अनन्तं नयतं स्थानं तस्य चान्तो न लभ्यते ।
B.Y.Y.005/008
चतुर्विंशतिस्थानेषु पादमूर्धान्तमस्तकम् ।
B.Y.Y.007/125
स गच्छति परं स्थानं ब्रह्मणः सदनं द्विजः ।
B.Y.Y.011/006
भुक्त्वा गच्छति तत्स्थानं यद् गत्वा न निवर्तते ।
H.P.J.002/012
उत्तमे प्राणायामे स्थानं ब्रह्मरन्ध्रमाप्नोति।
H.P.J.002/012
स्थानप्राप्त्यनुमेय उत्तमः।
H.P.J.003/113
...कन्दस्य स्थानं स्वरूपं चाह-ऊर्ध्वमिति।
H.P.J.003/113
एतेन कन्दस्य स्थानमुक्तम्।
H.P.J.004/038
...स्थानं तयोर्भेदाच्छाम्भव्यां बहिर्दृष्ट्या अवस्थितिः...।
H.P.J.004/043
...मध्ये चरति यस्मिन् मध्यप्रदेशे...तस्मिन् स्थाने...।
H.P.J.004/048
भ्रुवोर्मध्ये भ्रुवोरन्तराले शिवस्थान शिवस्येश्वरस्य...।
H.P.J.004/048
...शिवस्य सुखरूपस्यात्मनो वा स्थानमस्तीति शेषः।
H.P.J.004/051
स्थीयते स्थिरीभूयतेऽस्मिन्निति स्थानं प्राणस्य स्थानं...।
H.P.J.004/076
...पीठं स्थानं भ्रूमध्यं तत्र गतः प्राप्तोऽनिलः प्राणो...।
V.S.002/003
स्थानानि चैव वायूनां कर्माणि च पृथक् पृथक् ।
V.S.002/046
घ्राणे गलेऽक्षिदेशे च स्थानेष्वेतेषु तिष्ठति ।
V.S.002/055
ज्ञात्वैवं नाडिसंस्थानं वायुस्थानं प्रयत्नतः ।
V.S.003/065
पादाङ्गुष्ठात्तु पादस्य पृथक् स्थानं न विद्यते ।
V.S.003/074
स्थानेष्वेतेषु मनसा वायुमारोप्य धारयेत् ।
V.S.004/006
पादादि जानुपर्यन्तं पृथिवीस्थानमुच्यते ।
V.S.004/006
आपायोर्हृदयान्तं यद्वह्निस्थानं तदुच्यते ।
V.S.004/006
आजानोः पायुपर्यन्तमपां स्थानं प्रकीर्तितम् ।
V.S.004/008
एतेषां पृथिवीस्थाने लकारं धारयेद् बुधः ।
V.S.004/013
मरुतां मरुतां स्थाने वर्णदेवसमन्वितम् ।
V.S.004/016
धारणं यदिदं वायोः स्थानेष्वेतेषु पञ्चसु ।
V.S.004/018
वायूनां स्थानकर्माणि विदित्वा ध्यानमाचरेत् ।
V.S.005/055
राशिष्वेचेषु भूतानां स्थानेष्वपि विपर्यये ।

स्थानपूजा

Y.S.088
द्वादशस्थानपूजो वा बहुवत्सलभाषितम्।

स्थानयोग

B.Y.Y.009/015
अक्षराणि त्रिषष्टिर्वै स्थानयोगाद्भवन्ति हि ।

स्थावर

B.Y.Y.003/016
भवन्ति चास्मिन् भूतानि स्थावराणि चराणि च ।
H.P.J.004/013
...स्थावरजङ्गमं जगत् संसारः पतितः।

स्थित

H.P.J.001/022

...स्थितो भवेत्, एतत् कूर्मासनं भवेत्...।

H.P.J.001/027

...तालुन उपरिभागे स्थितस्य नित्यं क्षरतः...।

स्थिति

B.Y.Y.002/112

...मनसि च यत् स्थितिं करोति ।

B.Y.Y.007/174

तत्व भूताण्डपिण्डस्य स्थित्युत्पत्तिलयं तथा ।

H.P.J.001/026

परावर्तितमङ्गं...तादृशो यत्र तिष्ठेत् स्थितिं...।

H.P.J.004/015

ब्रह्मरन्ध्रे निर्व्यापारस्थितिः प्राणस्य लयः।

V.S.003/004

सृष्टिस्थित्यात्मकावेतौ मकारोन्त्योन्तकः स्मृतः ।

V.S.004/002

यमादिगुणसंयुक्ते मनसः स्थितिरात्मनि ।

V.S.004/050

कल्पान्तानलवद्वर्णं सृष्टिस्थित्यन्तकारणम् ।

स्थिर

H.P.J.001/021

तथा पादपूरणे एकस्मिन् वामोरुणि स्थिरं विन्यसेत्।

H.P.J.001/035

हृदये हृदयसमीपे हनुं चिबुकं सुस्थिरं सम्यक् स्थिरं...।

H.P.J.001/049

...धारयेत् स्थिरीकुर्यात् स मुक्तः।

H.P.J.002/001

दृढे स्थिरे कुक्कुटादिविवर्जिते सिद्धासन...।

H.P.J.002/002

...स्थिरदीर्घजीवित्वमिति यावत्।

H.P.J.002/048

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।

H.P.J.003/044

...स्थिरो निश्चलो भूत्वा।

H.P.J.003/053

...सुषिरावकाशे खेचरी मुद्रा तिष्ठते स्थिरीभवति।

H.P.J.003/070

...दृढं स्थिरं स्थापयेत् स्थितं कुर्यात्।

H.P.J.003/089

देहे यावद् बिन्दुः स्थिरस्तावत् कालभयं मृत्युभयं...।

H.P.J.003/090

चित्ते चले चलत्वात्, चित्ते स्थिरे स्थिरत्वाच्चित्ताधीनम्।

H.P.J.003/090

...शुक्रे स्थिरे जीवनाच्छुक्रे नष्टे मरणात् शुक्राधीनं...।

H.P.J.004/009

सद्गुरोः 'दृष्टिः स्थिरा यस्य विनैव दृश्यम्'...।

H.P.J.004/028

मनसः स्थैर्ये सति वायुः प्राणः स्थिरो भवेत्।

H.P.J.004/028

ततो वायुस्थैर्याद् बिन्दुर्वीर्यं स्थिरो भवेत्।

H.P.J.004/037

निश्चलतारया निश्चला स्थिरा तारा कनीनिका यस्यां...।

H.P.J.004/041

स्थिरं निश्चलं मनो यस्य स स्थिरमनाः...।

H.P.J.004/043

...तस्मिन् प्रदेशे खेचरी मुद्रा तिष्ठते स्थिरा भवति।

H.P.J.004/051

...प्राणः स्थिरतां निश्चलतामेति प्राप्नोति ।

H.P.J.004/054

...मनसोऽवलोकनेन स्थिरीकृत्येत्यर्थः।

H.P.J.004/114

ब्रह्मरन्ध्रं गतस्य स्थैर्याद् गत्वा न स्थिरो भवतीत्यर्थः।

V.S.005/031

चरस्थिरोभयात्मानो मेषाद्या राशयः क्रमात् ।

स्थिरपद

H.P.J.004/082

यावत् स्थिरं पदं स्थिरपदं तुर्याख्यं गच्छेत्।

स्थिरता

H.P.J.001/017

...रजोधर्मनाशकत्वेन स्थिरतां...।

स्थिरत्व

H.P.J.001/027

...स्थिरत्वं क्षरणाभावं च ददातीत्यर्थः ।

स्थिरात्मक

V.S.005/032

स्थिरात्मकाश्च याम्येस्युरुभयत्रोभयात्मकाः ।

स्थिरासन

H.P.J.004/072

...दृढासन: स्थिरासनो ज्ञानी...कुशलबुद्धिर्देवसमो...।

Y.S.105

स्थिरासनस्य जायन्ते तांस्तु ज्ञात्वा सुधीस्त्यजेत्।

स्थिरीकरण

H.P.J.004/114

...प्रबन्धात् कुम्भकेन स्थिरीकरणाद्बिन्दुर्वीर्यं दृढः...।

स्थिरीभाव

H.P.J.002/042

यो मनसः सुस्थिरीभावः...सैव मनोन्मन्यवस्था ।

H.P.J.004/006

इत्थं चात्माकारमनोवृत्तेः स्थिरीभावः समाधिरभिधीयत...।

H.P.J.004/044

शून्ये प्राणस्य स्थिरीभाव एव ग्रासः।

स्थूल

B.Y.Y.002/027

स्थूला जाग्रद्वृत्तिर्विज्ञेया योगतत्त्वज्ञैः ।

B.Y.Y.002/107

